Shri Raghunatha Temple MSS. Library,
६२९०
JAMMU

No. ६०

Title नकुला मुरली विधिः

Author

Extent २ पत्र Age

Subject तन्त्र

© Dharmarth Trust. Digitized By eGangotri

१

अथास्य षट्त्रिंशदक्षर बगलामुखीमंत्रस्य नारायणऋषिः त्रिष्टुप्छंदः बगलामुखीदुर्गा देवता ह्लीं बीजं ह्लीं शक्तिः क्लीं
कीलकं ॥ ॐ ह्लीं हृदं बगलामुखी शिरः । सर्वदुष्टानां शिखा । वाचं मुखं पदं स्तंभय कवचं । जिह्वां कीलय नेत्रं । बु
द्धिं विनाशय अस्त्रं ॥ ध्यानं ॥ जिह्वाग्रमादाय करेण देवी वामेन शत्रून् परीत्यादि ॥ अथ सुखप्रसवकरयक्षिणी
मंत्रोपि लिख्यते ॥ ब्रह्मा ऋषिः अनुष्टुप्छंदः यक्षिणी देवता ॥ मंत्रः ॥ हिमवत्युत्तरे पार्श्वे सुरथा नाम यक्षिणी
तस्या नूपुरशब्देन विशल्या भव गर्भिणि स्वाहा ॥ अनेन मंत्रेण तैलं दूर्वाग्रेण स्पृष्ट्वा जघ्नां गर्भिणीं प्राशयेत् ।
प्रसववेदनासमये शीघ्रं प्रसोष्यते ॥ शीघ्रप्रसवार्थ मंत्रांतरं ॥ ॐ ह्लीं द्रौं हः यं ॥ इति ॥ तैलमायाबीजं विलिख्य
अनेन मंत्रेण दूर्वाग्रेण स्पृष्ट्वा एकविंशतिवारं चाष्टोत्तरशतं वा अष्टोत्तरसहस्रं वा अभिमंत्रित तैलं प्रसववेदनास
मये स्त्रियं प्राशयेत् शीघ्रं प्रसोष्यते ॥ अथ राजमातंगी ॥ मतंगऋषिः महाविराट्छंदः राजमातंगेश्वरी देवता ।
ऐं बीजं । स्वाहा शक्तिः सर्ववशंकरी कीलकं । मम इष्टकाम्यार्थे विनियोगः ॥ ऐं ह्रीं श्रीं ऐं क्लीं सौः ॐ नमो भगवति हृदं
ऐं ह्रीं श्रीं ऐं क्लीं सौः श्रीमातंगीश्वरी सर्वजनमनोहरि शिरः । बीजानुस्क्रा सर्वमुखरंजिनि क्लीं ह्रीं श्रीं शिखा बी
जानुस्क्रा सर्वराजवशंकरि सर्वस्त्रीपुरुषवशंकरि कवचं । बीजानुस्क्रा सर्वदुष्टमृगवशंकरि सर्वसत्ववशंकरि
सर्वलोकवशंकरि अमुकं मे वशमानय स्वाहा नेत्रं । सौः क्लीं ऐं श्रीं ह्रीं ऐं अस्त्रं ॥ ध्यानं ॥ ध्यायेयं रत्नपीठे शुककल
रणितं भृण्वती श्यामगात्री न्यस्तैकांघ्रीं सरोजे शशिशकलधरां वल्लकीं वादयंती कल्हारबद्धमाला नियमितवि
लसच्चूडिकां रक्तवस्त्रां कर्णोद्यत्कुंडलाभां कठिनकुचभराक्रांतकांतावलग्नां । उन्मीलद्यौवनोद्यन्निविडमदभ
रोद्वेल्ललीलाविलासां रत्नग्रैवेयहारांगदकनककटीसूत्रमंजीरभूषां । आनीयार्थानभीष्टान् स्मितमधुरदृशा सा
धकानां र्पयंती देवीं ध्याये कुंकुमाभां शुकमपि च कलारूपमस्याश्च पार्श्वे । वामे विन्यस्तशालिनि स्तनतटे विन्यस्य
वीणामुखं तंत्रीतारविराविणी स्वकर लेरास्फालयंती मवे ॥ अथैवमी लद पंचमं सवलितं तंत्रीवं मुखं बिभ्रती १

© Dharmarth Trust. Digitized By eGangotri

[illegible] (१६) [illegible]

॥ श्रीगणेशाय नमः ॥ ॐ ह्लीं बगलामुखि सर्वदुष्टानां वाचं मुखं स्तंभय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ॐ
स्वाहा ॥ ३६ ॥ वियत्तत्पश्चिमस्वरयुक्तं द्वितीयबीजं ॥ स्तंभनप्रधानोयं मंत्रं ॥ अयुतं जपेत् । दशांशं पीतद्रव्यैर्जुहुं
हुनेत् ॥ पीतद्रव्यं हरिद्रा ॥ अथ पूजा ॥ मध्ये योनिं समालिख्य तद्बहिस्तु षडस्रकं । तद्बहिः अष्टदलं पद्मं तद्बहिः
षोडशच्छदं ॥ चतुरस्रं गृहं बाह्ये चतुर्द्वारे विशोभितं । एवं पूजाचक्रं विलिख्य अस्मिन् प्राक्तन नवमे पटले प्रोक्तं भुव
नेशी पीठं संपूज्य तस्मिन् बगलामुखीं समावाह्य समर्चयेत् । अंगैः । अथ मांडलिः ॥ गणेशाय । वटुकाय । योगिन्यै ।
क्षेत्रपालाय । इति पूर्वदक्षिणपश्चिमोत्तरेषु गुरुं परमगुरुं परमेष्ठिगुरुं परात्परगुरुं च । आग्नेयादिकोणेषु समर्चयेत् ।
पुनः बगलामुख्यै । स्तंभिन्यै । जंभिन्यै । मोहिन्यै । वश्यायै । अचलायै । बलायै । दुर्धरायै । कल्मषायै । धीरायै । कल्पनायै ।
कालकर्षिण्यै । भ्रामिकायै । मंदगमनायै । भोगायै । योगायै ॥ एताः षोडशस्वरवर्णैकैकपूर्विकाः षोडशपत्रेषु समर्चनी
याः । तदंतः अष्टपत्रेषु भुवनेशी बीजपूर्विकाः ब्राह्म्याद्याः समर्चनीयाः ॥ पुनः डांडाकिन्यै । रांराकिन्यै । लांलाकिन्यै । कां
काकिन्यै । शांशाकिन्यै । हांहाकिन्यै ॥ इति षट्कोणेषु समर्चयेत् । एवं विलिखितेपि षट्कोणाष्टदलषोडशदलक्र
मेण पूजाक्रमः ॥ पुनर्लक्ष्म्यादि दिक्पालादयः ॥ तद्बहिर्वज्रादिभिश्च समर्चयेत् । योन्यास्त्रिकोणमध्ये मूलदेवीं समर्चयेत् ॥
अथ प्रयोगः ॥ हरितालं हरिद्रां च लवणेन च संयुतं । स्तंभने होमयेद्देवि प्रज्ञां चैव गतिं मतिं ॥ स्तंभयेद्दितिद्वेषः । एतत्त्र
यं मिलित्वा हुनेदित्यर्थः ॥ प्रयोगांतरं ॥ हरिद्राहरितालाभ्यां जुहुयात् लवणं निशि । स्तंभयेत्सं च दिव्यानि नागकार्यवि
चारणं । स्तंभनेषु च सर्वेषु प्रयोगः प्रत्ययावहः ॥ अथवा पीतपुष्पैर्वा त्रिमध्वाक्तैश्च होमयेत् । अस्यार्थः ॥ हरिद्राचू
र्णैश्च हरितालचूर्णैश्च संयुक्तैर्लवणैर्हुनेत् । पंच दिव्यानि ॥ तुलाग्न्यादिविषं कोशो दिव्यानीति विष्णुहृदये । इति पंच
दिव्यानि ॥ पीतपुष्पाणि यानि कानिचित्पीतपुष्पाणि ॥ प्रयोगांतरं ॥ हरिद्राचूर्णं महिष्याज्यसिक्तैः पश्चिमाभिमुखो
राजा वश्यो नर सहस्रं हुत्वा आज्ञा इति श्च महिष्याज्यैश्च हुत्वा तत्संपातां च विलोड्य नारिकेलमर्धं छित्वा तस्मिन् [illegible] हो

© Dharmarth Trust. Digitized By eGangotri

मा= षा=

मायाकांचनमोहिनी विजयते मातंगकन्यामयी ॥१॥ इति ॥ ऐं ह्रीं श्रीं ऐं क्लीं सौः ॐ नमो भगवति श्रीमातंगीश्व
रि सर्वजनमनोहरि सर्वमुखरंजिनि क्लीं ह्रीं श्रीं सर्वराजवशंकरि सर्वस्त्रीपुरुषवशंकरि सर्वदुष्टमृगवशंकरि सर्व
सत्त्ववशंकरि सर्वलोकवशंकरि अमुकं मे वशमानय स्वाहा सौः क्लीं ऐं ह्रीं श्रीं ऐं ॥ इति मंत्रः । विद्यागानवशेषैश्वर्यप्रधा
नोयं मंत्रः ॥९८॥ अन्यत् पूर्ववत् तिलकोक्तं । तत्र वर्णितेमातंग्यै नमः इति यावकं कुर्यात् ॥ अयुतं जपेत् । अथ नव
मपटलोक्तं भुवनेशीपीठं ॥ ॐ जयायै नमः १ विजयायै नमः २ अजितायै ३ अपराजितायै ४ नित्यायै ५ विलासि
न्यै ६ दोग्ध्र्यै ७ अघोरायै ८ मंगलायै ९ एतास्तु नवशक्तयः ॥ ह्रीं श्रीं भुवनेश्वर्यासनाय नमः ॥ ह्रीं भुवनेश्वरी
मूर्तये नमः ॥ इति कर्णिकायां ॥ इति पीठमंत्रः ॥ पुनः प्रथमं ॥ हल्लेखायै नमः ॥ ऊर्ध्ववक्त्रायै नमः ॥ गगनायै
पूर्ववक्त्रायै ॥ ॐ हूं रक्तायै दक्षिणवक्त्रायै ॥ ॐ ह्रीं करालिकायै (ॐ ह्रीं) उत्तरवक्त्रा ॥ ॐ ह्रां महोच्छु (ॐ ह्रैं) ष्मायै
पश्चिमवक्त्रायै ॥ इति प्रागादिदिक्षु एतास्तु प्रधानदेवतासदृशाः । एवं प्रथमावृत्तिः ॥ अग्रे द्वितीया तत्रांगा
नि ॥ शक्तिः ऋषिः गायत्री छंदः बोधस्वरूपा संविद्देवता हं बीजं ईं शक्तिः ह्रीं हृदय ह्रीं शिर इत्याद्यंगानि ॥
पुनः ह्रां गायत्र्यै नमः ऐन्द्रे । ह्रीं सावित्र्यै नमः (सुख) इति नैरृत्ये । हूं सरस्वत्यै नमः वायव्ये ॥ ह्रां ब्रह्मण्यै नमः आ
ग्नेये ॥ ह्रीं विष्णवे नमः वारुणे ॥ हूं रुद्राय ऐशान्ये ॥ एवं द्वितीयावृत्तिः ॥ ॐ आं ब्रह्माण्यै । ॐ ईं माहेश्वर्यै ॥
ॐ ऊं कौमार्यै ॥ ॐ ऋं वैष्णव्यै ॥ ॐ लृं वाराह्यै ॥ ॐ ऐं इन्द्राण्यै ॥ ॐ औं चामुंडायै ॥ ॐ अः महालक्ष्म्यै ॥ एवं मा
तृभिः चतुर्थ्यावृत्तिः ॥ पुनः इन्द्रादिभिः पंचमी वृत्तिः ॥ अं ब्रह्मगायत्रीभ्यां नमः ॥ उं विष्णुसावित्रीभ्यां ॥
मं ईश्वरसरस्वतीभ्यां ॥ श्रीं धनपतिश्रीभ्यां ॥ क्लीं स्मररतिभ्यां ॥ गं गणपतिपुष्टिभ्यां ॥ ॐ शंखनिधये नमः ॥
ॐ पद्मनिधये । सर्वगमावर्णिते मूलेन व्यापकं विधेयं ॥ इति त्रिपुरार्णवे भुवनेशीयंत्रगपूजनं प्रपंच
सारोक्तं समाप्तम् ॥ नवमपटले ॥

© Dharmarth Trust. Digitized by eGangotri

3/

रा बगुला कोधि:

श्लोक ५१

नं ७१



© Dharmarth Trust. Digitized By eGangotri